# ॥ गोसू॒क्तम् ॥

आगावो॑ अग्मन्नु॒त भ॒द्रम॑क्रन्। सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे। प्र॒जाव॑तीः पु॒रु॒रूपा॑ इ॒ह स्युः। इन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः। इन्द्रो॒ यज्व॑ने पृण॒ते च॑ शिक्षति। उपेद्द॑दाति॒ न स्वं मु॑षायति। भूयो॑भूयो र॒यिमिद॑स्य व॒र्धय॑न्। अभि॑न्ने खि॒ल्ले निद॑धाति देव॒युम्। न ता न॑शन्ति॒ न द॑भाति॒ तस्क॑रः। नैना॑ अमि॒त्रो व्यथि॒राद॑धर्षति। दे॒वाग्श्च॒ याभि॒र्यज॑ते॒ ददा॑ति च। ज्योगित्ताभि॑ः सचते॒ गोप॑तिः स॒ह। न ता अर्वा॑ रे॒णुक॑काटो अश्नुते। नसग्ग॑स्कृत॒त्रमुप॑यन्ति॒ ता अ॒भि। उ॒रु॒गा॒यमभ॑यं॒ तस्य॒ ता अनु॑। गावो॒ मर्त्य॑स्य॒ विच॑रन्ति॒ यज्व॑नः। गावो॒ भगो॒ गाव॒ इन्द्रो॑ मे अच्छात्। गाव॒ः सोम॑स्य प्रथ॒मस्य॑ भ॒क्षः। इ॒मा या गाव॒ः सज॑नास॒ इन्द्र॑ः। इ॒च्छामीद्धृ॒दा मन॑सा चि॒दिन्द्र᳚म्। यू॒यं गा॑वो मेदयथा कृ॒शं चि॑त्। अ॒श्ली॒लं चि॑त् कृणुथा सु॒प्रती॑कम्। भ॒द्रं गृ॒हं कृ॑णुथ भद्रवाचः। बृ॒हद्वो॒ वय॑ उच्यते स॒भासु॑। प्र॒जाव॑तीः सू॒यव॑सग्ं रि॒शन्ती᳚ः। शु॒द्धा अ॒पः सु॑प्रपा॒णे पिब॑न्तीः। माव॑ः स्ते॒न ई॑शत॒ माघश॑ग्ंसः। परि॑वो हे॒ती रु॒द्रस्य॑ वृंज्यात्। उपे॒दमु॑प॒पर्च॑नम्। आ॒सु गोषूप॑ पृच्यताम्। उप॑र्ष॒भस्य॒ रेत॑सि। उपे᳚न्द्र॒ तव॑ वी॒र्ये᳚॥

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः

 13 May 2006